## सार्वधातुकार्धधातुकयोः । (८४/२१६८)

सार्वधातुके आर्धधातुके च [1]प्रत्यये परतः इगन्तस्याङ्गस्य गुणो भवति । [2]तरति । नयति । भवति । सार्वधातुकार्धधातुकयोः इति किम् ? अग्नित्वम्[3] । अग्निकाम्यति । आर्धधातुके – कर्ता । चेता । स्तोता । यदि हि प्रत्यये [4]सङि इति वा उच्येत, इहापि[5] स्यात् ॥

## जाग्रोऽविचिण्णल्ङित्सु । (८५/२४८०)

जागृ इत्येतस्याङ्गस्य गुणो भवति अविचिण्णल्ङित्सु परतः । जागरयति । जागरकः । साधुजागरी । जागरंजागरम् । जागरो वर्तते । जागरितः । जागरितवान् ।

वृद्धिविषये प्रतिषेधविषये च यथा स्यात् इति जागर्तेरयं गुणः आरभ्यते । [6]तस्मिन् कृते या 'अत उपधायाः' (७.२.११६/२२८२) [7]वृद्धिः प्राप्नोति [8]सा न भवति । यदि हि स्यात् अनर्थक एव गुणः स्यात्, चिण्णलोश्च प्रतिषेधवचनमनर्थकम् । अविचिण्णल्ङित्सु इति किम् ? 'जॄशॄस्तॄजागृभ्यः क्विन्' (उ. ५०३) जागृविः । चिण् – अजागारि । णल् – जजागार । ङित् – जागृतः । जागृथः ।

वि इति केचिदिकारमुच्चारणार्थं वर्णयन्ति, क्वसावपि वकारादौ गुणो न भवति । जजागृवान् । [9]अजागरुः, अहं जजागर इत्यत्र प्रतिषेधः प्राप्नोति ? न, अप्रतिषेधात् । अविचिण्णल्ङित्सु इति पर्युदासोऽयम्[10], अथवा जाग्रः इति[11] प्राप्तिरसावानन्तर्याद् विचिण्णल्ङित्सु प्रतिषिध्यते । या तु 'जुसि च' (७.३.८३/२४८१), 'सार्वधातुकार्धधातुकयोः' (७.३.८४/२१६८) इति च [12]प्राप्तिः, सा न प्रतिषिध्यते ॥

## पुगन्तलघूपधस्य च । (८६/२१८९)

पुगन्तस्याङ्गस्य लघूपधस्य च सार्वधातुकार्धधातुकयो[13]र्गुणो भवति । पुगन्तस्य – क्लेपयति । ह्लेपयति । क्नोपयति । लघूपधस्य – भेदनम् । छेदनम् । भेत्ता । छेत्ता । प्रत्ययादेरङ्गावयवस्य च हलोरानन्तर्ये सति लघूपधगुणो न [14]व्यावर्त्यते इति ज्ञापितम् एतत् [15]क्नुसनोः कित्करणेन, 'त्रसिगृधिधृषिक्षिपेः क्नुः' (३.२.१४०/३१२०), 'हलन्ताच्च' (१.२.१०/२६१३) इति ।

संयोगे गुरुसञ्ज्ञायां गुणो भेत्तुर्न सिध्यति ।
विध्यपेक्षं लघोश्चासौ कथं कुण्डिर्न दुष्यति ॥

धातोनुमः कथं रञ्जेः स्यन्दिश्रन्थ्योर्निपातनात् ।
अनङ्गलोपशिदीर्घत्वे विध्यपेक्षे न सिध्यतः ॥

अभ्यस्तस्य यदाहाचि लङर्थं तत्कृतं भवेत् ।
क्नुसनोर्यत्कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे ॥ (म.भा. ३.३३८)

---

1. प्रत्यये नास्ति इ. 2. तरति नास्ति क. 3. अग्निना इत्यधिकम् ब. 4. गुणो भवति इत्यधिकम् क. 5. गुणः इत्यधिकम् इ.ह. 6. अस्मिन् क. 7. इति इत्यधिकम् ब.क.इ. 8. सा अपि क. 9. अजागरुः नास्ति क. 10. न प्रसज्यप्रतिषेधः इत्यधिकम् क. 11. या इत्यधिकम् इ. 12. वा इ, प्राप्तिः नास्ति क. 13. परतः इत्यधिकम् क.इ. 14. व्यावर्तते ब. 15. क्वसनोः ब.